International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 41-45
© 2026 IJMH
www.themultijournal.com
Received: 25-06-2026
Accepted: 15-07-2026
Publish : 16-07-2026

**नन्दिनी मिश्रा**
शोधच्छात्रा, सर्वदर्शन विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-
विद्यालयः,कुतुबसांस्थानिकक्षेत्रम्,
नवदेहली - 110016

**Correspondence:**
**नन्दिनी मिश्रा**
शोधच्छात्रा, सर्वदर्शन विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-
विद्यालयः,कुतुबसांस्थानिकक्षेत्रम्,
नवदेहली - 110016

# शिवजीउपाध्यायकृतसर्वदर्शनविमर्शग्रन्थे प्रतिपादितस्य कार्यकारणवादसिद्धान्तस्य वैशिष्ट्यम्

**नन्दिनी मिश्रा**

**Abstract :**

कस्या अपि संस्कृत्याः समाजस्य वा उन्नतेः मुख्याधारः तस्य समाजस्य समुन्नतपरिवेशः भवति । सुव्यवस्थितसमाजे एव समुन्नतसंस्कृत्याः उत्थानं भवितुमर्हति । मानसिकसंतापरहिते प्राकृतिक-वातावरणे च मानवमस्तिष्कस्य विकासो भवति । अत एव मानवमस्तिष्कस्य समग्रविकासार्थं दर्शनशास्त्रस्य महती भूमिका वर्तते । 'दृशिर् प्रेक्षणे' धातोः 'ल्युट्' प्रत्यययोगात् दर्शनशब्दो निष्पद्यते । अस्मिन् जगति मानवः ज्ञानेन्द्रियैः विषयाणां प्रत्यक्षं करोति । सांसारिक विषयेभ्योऽतिरिक्ता अपि केचन पारलौकिकविषयाः सन्ति तेषां साक्षात्कारः लौकिकदृष्ट्या भवितुं नार्हति । तत्रैव दर्शनशास्त्रस्योद्भवः जायते । वास्तविकरूपेण दर्शनशास्त्रं मानवजीवने मूल्यानां संवर्धनं परिशुद्धचिन्तनधारायाः प्रवाहं च करोति ।

भारतीयज्ञानपरम्परायां प्राचीनकालादेव सर्गप्रतिसर्गयोः विषये महर्षिभिः अन्वेषणं कृतम् । सृष्ट्योत्पत्तेः कारणानामनुसन्धानं तेषां चिन्तनस्य प्रमुखः विषयः अस्ति । विभिन्नैः दार्शनिकैः स्व - स्वदृष्ट्या पदार्थानां यादृशः साक्षात्कारः कृतः तस्यैते 'दर्शनम्' इति नाम्ना व्यवहारो भवति । दर्शनशास्त्रस्य अध्ययने त्रीणां तत्त्वानां समावेशो भवति - तत्त्वमीमांसा, ज्ञानमीमांसा, आचार-मीमांसाश्चेति । अस्मिन् जगति सर्वेऽपि पदार्थाः उत्पत्तिविनाशशीलाः इति अनुभवसिद्धमेव । तेषामुत्पत्तिविषये मनसि प्रश्नः आयाति यदिदम् आकस्मिकम् अथवा कारणजन्यम् ? पुराकालादेव अस्य विषयस्योपरि दार्शनिकैः गहनान्वेषणं कृतम् । विभिन्नेषु दर्शनेषु पदार्थानाम् उत्पत्तिविषये कारणविषये मतभेदाः दृश्यन्ते तदाधारेण आचार्यशिवजीउपाध्यायविरचितसर्वदर्शनविमर्शग्रन्थेऽपि कार्यकारणवा-दसिद्धान्तस्य सङ्ग्रहरूपेण विवेचनं कृतं वर्तते । शोधपत्रेऽस्मिन् सारल्येन तेषां कार्यकारणविषयक सिद्धान्तानामवबोधः यथा स्यात्तथा प्रस्तुतीकरणं करिष्यते ।

**Key Words : कार्यकारणवादः, सत्कार्यवादः, विवर्तवादः, परिणामवादः, असत्कार्यवादः**

## भूमिका -

'दृशिर् प्रेक्षणे' धातोः 'ल्युट्' प्रत्यययोगात् दर्शनशब्दस्य निष्पत्तिर्भवति । अस्य व्युत्पत्तिलभ्य अर्थः भवति - 'दृश्यतेऽनेनेति दर्शनम्' अथवा येन साधनेन विशिष्टज्ञानस्य साक्षात्कारः क्रियते तद् 'दर्शनम्' इति कथ्यते । यदा मानवजीवनस्य उत्पत्तिः अभवत् तदा एव दर्शनशास्त्रस्यापि उद्भवो जातः इति वयं अनुमातुं शक्नुमः । यदा मानवः कर्त्तव्याकर्त्तव्यस्य विषये चिन्तनं कृतवान् तदा एव सुखप्राप्तिः दुःखनाशस्य च उपायानां विषयेऽपि चिन्तितवान्, स्वस्य परितः स्थावर - जङ्गमस्य जगतः विषयेऽपि विचारं कृतवान् । यथा - जगतस्यास्य कः कर्त्ता ? कानि चास्य कारणानि ? कथमेतत् जगतः उत्पत्तिविनाशयोः क्रमः प्रचलति ? एतादृशानां विषयाणामपि विमर्शः दर्शनशास्त्रे कृतो दृश्यते । स एव सिद्धान्तः दर्शनशास्त्रे कार्यकारणवादसिद्धान्तः इति नाम्ना प्रसिद्धः वर्तते । समेषु भारतीयदर्शनेषु अस्य कार्यकारणवादसिद्धान्तस्य विषये सूक्ष्मतया विवेचनं कृतमस्ति ।

कार्यकारणवादस्य विषये प्रथमोऽयं प्रश्नः मनसि आयाति यत् किं नाम कार्यम् किञ्च कारणमिति ? कारणानां विषये भारतीयदर्शनेषु सिद्धान्तद्वयं वर्तते । तयोः प्रथमः साङ्ख्य - वेदान्तिनां सिद्धान्तः, अपरश्च न्याय - वैशेषिकानां सिद्धान्तः । साङ्ख्ययोगनये वेदान्तनये च कारणं द्विविधम् - उपादानं निमित्तञ्च । एतयोर्मध्ये यत् कारणं व्यापारेण कार्यरूपे परिवर्तितं भवति तद् उपादानमिति कथ्यते । न्यायदर्शनदृष्ट्या उपादानकारणं कार्यात् भिद्यते । यथा - तन्तुभिः पटस्य निर्माणं भवति तर्हि तन्तवः पटस्य उपादानकारणमस्ति । उपादानकारणस्य कार्यरूपेण परिवर्तनं भवति, अस्मिन् प्रक्रियायां येषां कारणानां साहाय्यम् अपेक्ष्यते ते निमित्तकारणानीति उच्यन्ते । निमित्तकारणस्यापि द्वौ भेदौ स्तः - साधारणं विशेषश्च । यस्य कारणस्य कार्यं प्रति विशिष्टता अनिवार्यता वा भवति, तत् कारणं 'विशेषः' इति कथ्यते, यथा - पटस्य निर्माणे सौचिकः तन्तुवायः वा। सर्वेष्वेव कार्येषु येषां कारणानां विद्यमानता सामान्येन भवति, ते साधारणानीति कथ्यन्ते, यथा - दिक्कालादि साधनानि । साधारणानां कारणानां विद्यमानता उत्पन्नेषु समेष्वेव कार्येषु भवति ।

न्यायदर्शने कारणानां वर्गीकरणं पृथग्रूपेण वर्तते । न्यायनये त्रीणि कारणानि सन्ति - समवायिकारणम्, असमवायिकारणम्, निमित्तकारणञ्च ।[1] तर्कभाषानुसारेण यत्र समवेतरूपेण कार्यमुत्पद्यते तत् समवायिकारणमिति कथ्यते, यथा - मृत्तिका घटस्य समवायिकारणम् अस्ति । अपरः कारणम् असमवायिकारणम् अस्ति । यः समवायिकारणे प्रत्यासन्नं भवति तथा च यस्मिन् कार्योत्पत्तेः सामर्थ्यः भवति तत् कारणं असमवायिकारणमिति कथ्यते।[2] प्रत्यासन्नपदस्य अर्थः भवति 'सामीप्यम्' । अर्थात् यस्य कारणस्य समवायिप्रत्यासन्नता भवति तत् असमवायिकारणमिति उच्यते। यथा - तन्तुसंयोगः पटस्य असमवायिकारणम् अस्ति। यः समवायिकारणं नास्ति असमवायिकारणमपि नास्ति तत् कारणं निमित्तमिति कथ्यते।[3] यथा - कुम्भकारः घटं प्रति निमित्तकारणम् अस्ति तथा च तन्तुवायः पटं प्रति निमित्तकारणम् अस्ति । न्यायदर्शनेऽसाधारणं कारणं करणमिति स्वीकृतमस्ति । तत्र निमित्तकारणेषु यदासाधारणं तदेव करणमिति ज्ञायते, यथा - घटं प्रति दण्डः ।[4] नैयायिकाः वैशेषिकाश्च धर्मधर्मिणोर्मध्ये भिन्नतां प्रतिपादयन्ति । एतयोर्मतानुसारेण पटः पटरूपश्च भिन्नौ पदार्थौ स्तः तथा च एतयोः कारणान्यपि भिन्नौ स्तः । अत एव एतयोः दर्शनयो समवायिकारणमसमवायिकारणमिति कारणभेदद्वयमधिकं स्वीक्रियते। साङ्ख्यदर्शने वेदान्तदर्शने च धर्मी - धर्मश्च उभयोः अभेदरूपं वर्णितमस्ति । अतः अत्र समवाय्यसमवायिकारणयोः अन्तर्भावः उपादान कारणे एव भवति ।

कार्यकारणसिद्धान्तस्य विषये भारतीयदर्शनेषु सूक्ष्मतमरूपेण चिन्तनं कृतमस्ति । आस्तिकेषु नैयायिकाः वैशेषिकाः साङ्ख्याः वेदान्तिनश्च तथा च नास्तिकेषु जैनबौद्धादयः सम्प्रदायाः विषयेऽस्मिन् स्व - स्व सिद्धान्तानां प्रतिपादनं कृतवन्तः । सर्वेष्वेव सम्प्रदायेषु विद्यमानानां तेषां मूलभूत सिद्धान्तानामाधारेण कार्यकारणसिद्धान्तेऽपि भिन्नता वर्तते । यथा - क्षणिकवादिनः बौद्धानां सिद्धान्तः असद्कारणवादः, साङ्ख्यदार्शनिकानां सिद्धान्तः सत्कार्यवादः, अद्वैतवादिनां विवर्तवादः, विशिष्टाद्वैतदर्शने परिणामवादः, नैयायिकानां वैशेषिकाणां च सिद्धान्तः असत्कार्यवादः इति नाम्ना प्रसिद्धमस्ति । एतेषां संक्षिप्तरूपेण उल्लेखः निम्नप्रकारेण वर्तते ।

**असत्कारणवादः** - सिद्धान्तोऽयं क्षणिकवादिनां बौद्धानां वर्तते । बौद्धमतानुसारेण कारणस्य नश्यतानन्तरं कार्यस्योत्पत्तिर्भवति । यथा - कश्मिंश्चित् भूम्यां यदा बीजारोपणं भवति समयानन्तरं बीजे नष्टे जाते तस्मिन् अङ्कुरोत्पत्तिर्भवति । बौद्धाः अस्मिन् जगति समेषां वस्तूनां क्षणिकमात्रसत्तां स्वीकुर्वन्ति । 'यत् क्षणिकम् तत् सत्' इति सिद्धान्तमनुसृत्य बौद्धाः कथयन्ति यत् कार्यकारणयोः युगपत् प्रवृत्तिः भवितुं नार्हति । यदा कारणस्य स्थितिर्भवति तदा कार्यस्य सत्ता भवितुं नार्हति तथा च कारणस्य नश्यतानन्तरमेव कार्यस्योत्पत्तिर्भवति । अर्थात् कारणस्य असदवस्थायामेव कार्यस्य उत्पत्तिः सम्भाव्यते । एतस्मादेव कारणात् बौद्धानां कार्यकारणसिद्धान्तः 'असत्कारणवादः' इति नाम्ना प्रसिद्धोऽस्ति ।

**सत्कार्यवादः** - सत्कार्यवादस्य सिद्धान्तः साङ्ख्यदार्शनिकानां वर्तते । अस्य सिद्धान्तस्यानुसारेण कार्यम् उत्पत्तेः पूर्वं कारणे एव सत् रूपेण विद्यते । यथा - 'तिलम्' इति पदार्थे तैलस्य सत्ता भवति अतः पर्याप्तरूपेण यदा तिलानां ग्रहणं भवति तदा तेषु तिलेषु तैलस्य प्राप्तिर्भवति परन्तु बालुकायां तैलस्य सत्ता भवितुं नार्हति अतः बालुकया तैलस्य प्राप्तिरपि न भवति । अतएव सांख्यदर्शने कार्यं सद्रूपेण कारणे एव विद्यते । साङ्ख्यकारिकायाः नवमकारिकायां सत्कार्यवादस्य स्थापनया पञ्चहेतूनामुल्लेखः प्राप्यते ।[5] गौड़पादभाष्येऽपि भाष्यकारेण प्रधानरूपे प्रकृतेः सदसत् स्वरूपस्य चिन्तनं कृतमस्ति । एतेषां पञ्चहेतूनां माध्यमेन बौद्धादीनामसत्कार्यवादस्य निरासः आचार्येण उल्लिखितं वर्तते ।[6]

- **असद्करणात्** - पदार्थस्य असद्रूपे वा अविद्यमाने सति तस्य कार्यरूपेण उत्पत्तिः भवितुं न शक्नोति । यथा - बालुकायां तैलस्य विद्यमानता न भवति अतः बालुकया तैलस्य प्राप्तिरपि भवितुं नार्हति । तैलं तेनैव पदार्थेन प्राप्तुं शक्यते यस्मिन् पूर्वमेव तैलस्य सद्रूपेण विद्यमानता भवति, यथा - तिलानि ।[7]

- **उपादानग्रहणात्** - कार्यविशेषस्य उत्पत्तये कारणविशेषस्य आवश्यकता भवति । यथा - पटनिर्माणे तन्तुः विशिष्टकारणं तथा च घटनिर्माणे मृदायाः विशिष्टकारणत्वं वर्तते । घटनिर्माणे तन्तूनां अथवा पटनिर्माणे मृदायाः कारणरूपेण ग्रहणं भवितुं नार्हति । एतेन सिद्ध्यति यत् कार्यकारणयोः कश्चन् विशिष्टः सम्बन्धः भवति तथा च कार्यं कारणे उपादानरूपेण सद्रूपेण वा निहितो भवति । गौड़पादभाष्येऽपि उल्लिखितं वर्तते यत् लोकेऽस्मिन् यः येनार्थी भवति स तदुपादानस्य ग्रहणं करोति । यथा - दध्यर्थिना क्षीरस्येव ग्रहणं क्रियते न तु जलस्य ।[8]

▪ **सर्वसम्भवाभावात्** - असम्बद्धस्य कार्यस्योत्पत्तिः स्वीक्रियते चेत् कस्मादपि कारणात् कस्यापि कार्यस्य उत्पत्तिः भवितुं शक्यते । यथा- तन्तुभिः घटस्य, मृदायै पटस्य उत्पत्तिः सम्भवति । अतः कारणे सत् रूपेण विद्यमानस्य कार्यस्य एव उत्पत्तिर्भवति ।[9]

▪ **शक्तस्य शक्यकरणात्** - साङ्ख्यमतावलम्बिनः कथयन्ति यत् कश्मिंश्चिदपि कारणे कार्यविशेषस्य निर्मातृशक्तिर्भवति । एकैव कारणं समेष्वेव कार्येषु उत्पादयितुं न शक्नोति, यदि एवं स्वीक्रियते चेत् कार्यकारणसिद्धान्ते असंगतिः भविष्यति । तर्हि मृदया पटनिर्माणं तथा च तन्तुभिः घटनिर्माणं स्वीकर्त्तव्यम् । अतः एवं वक्तुं शक्यते यत् कारणे किमपि विशिष्टस्य कार्यस्योत्पत्तिः एव सम्भवति न च सर्वेषां कार्याणामुत्पत्तिः ।[10]

▪ **कारणभावात्** - साङ्ख्यमते कार्यस्य स्थितिः कारणात्मकरूपेण एव भवति अर्थात् यादृशाः गुणाः कारणे भवन्ति तादृशाः एव कार्येऽपि वर्तन्ते, यथा - तन्तुगुणाः पटे, मृदायाः गुणाः घटे दृश्यन्ते । तर्हि कारणं सद्रूपेण भवति अतः कार्यमपि सद्रूपेणेव स्वीकर्त्तव्यम् ।[11]

साङ्ख्यदार्शनिकानां मतानुसारेण तन्तुः एव किञ्चित् विशिष्टाकृतिं प्राप्य पटरूपेण परिवर्तितं भवति । परिवर्तनेऽस्मिन् पटः कोऽपि नूतनवस्तुः नास्ति अपितु कारणभूतेषु तन्तुषु कार्योऽयं अन्तर्निहितो भवति। यस्य कारणव्यापारेण प्रकटीकरणं भवति । पुनः यदा कार्यस्य नाशो भवति अथवा सृष्टेः लयः जायते तदा एतत् सर्वं कार्यं पुनः कारणे एव लीनं भवति । एषा प्रक्रिया कच्छपस्य स्वशरीरावयव प्रकाशनस्येव भवति । अतः साङ्ख्यमते अव्यक्तपदार्थः कारणं तथा च व्यक्तपदार्थः कार्यमिति रूपेण स्वीक्रियते । श्रीमद्भगवद्गीतायाः द्वितीयेऽध्यायेऽपि सत्कार्यवादस्य सङ्केतः प्राप्यते ।[12]

**परिणामवादः-** साङ्ख्यदर्शनस्य सत्कार्यवादसिद्धान्तः विशिष्टाद्वैतदर्शने योगदर्शने च 'परिणामवादः' इति नाम्ना प्रसिद्धोऽस्ति। एतन्मतानुसारेण कारणस्य एव कार्यरूपेण परिणतिः भवति तथा च परिवर्तनोऽयं यथार्थरूपेण भवति । यथा - तन्तुभिः पटस्य निर्माणं भवति तर्हि तन्तवः पटे परिवर्तन्ते । एवमेव सुवर्णस्य परिणतिः आभूषणेषु भवति तथा च दुग्धस्य परिवर्तनानन्तरं दधिः परिणामरूपेण प्राप्यते ।

**विवर्तवादः** - अद्वैतवादिनां मते ब्रह्मैव यथार्थवस्तुः एवं तस्यैव यथार्थसत्ता भवति, तस्यातिरिक्तं सर्वं अवास्तविकमेव अतः शङ्कराचार्यः अद्वैतवादिनश्च मन्यन्ते यत् यदा कारणात् कार्यस्योत्पत्तिः भवति तदा परिवर्तनोऽयं अयथार्थरूपेण भवति । अस्य परिवर्तनस्य भ्रमरूपात्मिका प्रतीतिः भवति, अतः तेषां कार्यकारणसिद्धान्तः 'विवर्तवादः' इति नाम्ना प्रसिद्धोऽस्ति । अद्वैतवादिनः दृष्टान्तं प्रस्तुवन्ति यत् यथा - प्रकाशरहिते स्थाने असर्पभूतायां रज्जौ सर्पस्य प्रतीतिर्भवति, एषा प्रतीतिः अवास्तविकरूपा भ्रमात्मिका अयथार्था च भवति । तेषां मते जगतः प्रतीतिरपि भ्रमात्मिका एवास्ति । अतः सा प्रतीतिः 'विवर्तवादः' इति कथ्यते । वेदान्तसारे परिणामवादस्य विवर्तवादस्य च उल्लेखः स्पष्टतया प्राप्यते ।[13]

**असत्कार्यवादः-** न्यायवैशेषिकदर्शने मीमांसादर्शने च कार्यकारणसिद्धान्तः 'असत्कार्यवादः' इति नाम्ना प्रसिद्धमस्ति । असत्कार्यवादस्य अभिप्रायः भवति कार्यम् उत्पत्तेः पूर्वम् असत् रूपेण विद्यते । यथा - मृदायै घटस्य निर्माणं भवति तर्हि घटं किमपि नूतनमेव कार्यमस्ति यस्य विद्यमानता प्राक् मृदारूपी कारणे न भवति । असत्कार्यवादस्य सिद्ध्यै निम्ना युक्तयः सन्ति -

नैयायिकाः कथयन्ति यत् यदि कार्य - कारणयोः अभिन्नता वर्तते चेत् तर्हि कार्यस्योत्पत्तये कारणस्य आवश्यकता न भवितव्या । यदि कारणव्यापारः अनिवार्यः अस्ति चेत् कार्यकारणयोः भिन्नता वर्तते एव । इतोऽपि यावन्तो प्रयोजनानि पटरूपी कार्येण सिद्ध्यन्ते तावत् तन्तुरूप - कारणेन कर्तुं न शक्यन्ते । एतेन सिद्ध्यति यत् कारणस्य कार्यस्य उभयोरेव भिन्नता वर्तते । असत्कार्यवादिनां नैयायिकानां सिद्धान्तः अस्ति यत् कार्यकारणयोः पृथकत्वेऽपि एकेन कारणेन एकं निश्चितकार्यमेव उत्पद्यते ।

**सर्वदर्शनविमर्शः -**

भारतीयज्ञानपरम्परायाः दार्शनिकसिद्धान्तानां संकलनम् एकस्मिन्नेव ग्रन्थे सरलरीत्या भवेदिति कामनया माधवाचार्येण 'सर्वदर्शनसंग्रहः' इति ग्रन्थः रचितः । तत्रापि सिद्धान्तज्ञाने किञ्चित्काठिन्यमनुभूयमानेन आचार्येण शिवजीउपाध्यायवर्येण 'सर्वदर्शनविमर्शः' नामकोऽयं ग्रन्थः विरचितः । ग्रन्थेऽस्मिन् आहत्य सप्तदशोत्तर - एकसहस्र (1017) श्लोकाः सन्ति । सकलदर्शनसिद्धान्तप्रकाशकोऽयं ग्रन्थः सरस - ललित - सुबोधाश्च पद्यैः निर्मितो वर्तते । ग्रन्थस्य विभाजनं परामर्शेषु अस्ति । अस्य ग्रन्थस्य आरम्भे आचार्यशिवजीउपाध्यायेन सप्तपद्येषु मङ्गलाचरणं कृतं वर्तते । ग्रन्थे भगवच्छिवस्याराधनां कुर्वन् ग्रन्थकारो मङ्गलाचरणं सम्पादयति यत् -

**"चञ्चच्चूडान्तचुम्बत्सुरसरिदुदयत्कूटकौटिल्यभावो-**
**द्रेकामेकान्तरोषाद् विलुलितवदनां मानिनीमम्बिकां ताम् ।**
**देवि ! प्रेम्णा प्रसीदेत्यनुनयविधौ तत्परश्चाटुकारो,**
**द्रागारोप्याङ्कपालीमनुमुदितशिवो यश्शिवस्सोवतान्नः ॥"**

आहत्य ग्रन्थेऽस्मिन् अष्ट परामर्शाः सन्ति । अष्टसु परामर्शेषु सृष्टि - मोक्ष - पुनर्जन्म - जीवात्म - प्रमा - प्रमाण इत्यादिविषयाणां वर्णनमस्ति। प्रथमपरामर्शे 'सुखादिभूमिः' इतिविषयस्य निरूपण-मस्ति । द्वितीयपरामर्शे वेदान्तादिमतानां ( मोक्षसाधन -सृष्टिक्रम - पुनर्जन्म-सूक्ष्मलिङ्ग -जीवात्म) प्रभृतिविषयाणां निरूपणमस्ति । तृतीयपरामर्शे प्रमाण - प्रमेयादि विषयाणां निरूपणं वर्तते। चतुर्थपरामर्शे नैयायिकरीत्या अनुमानप्रमाणस्य वर्णनमस्ति। पञ्चमपरामर्शे ईश्वरस्य जीवस्य च निरूपम् आचार्येण कृतं वर्तते । षष्ठपरामर्शे कार्यकारणवाद - आरम्भवाद - परमाणुवाद इत्यादि विषयाणामुल्लेखो वर्तते । सप्तमपरामर्शे चार्वाक - बौद्ध - रामानुज - माध्वादि

सम्प्रदायानामुल्लेखोऽस्ति । अन्तिमे अष्टमपरामर्शे मीमांसा – माहेश्वरादि सम्प्रदायाणां निरूपणमाचार्यपादैः कृतमस्ति ।

**सर्वदर्शनविमर्शग्रन्थे कार्यकारणवादः -**

आचार्य शिवजीउपाध्यायेन 'सर्वदर्शनविमर्शः' नामके ग्रन्थे विंशति श्लोकेषु कार्यकारणवाद विषयक सिद्धान्तानां संकलितरूपेण उल्लेखः कृतोऽस्ति । आरम्भे दशसु श्लोकेषु कार्य - कारणभेदाः तथा च तयोः परस्परसम्बन्धस्य समीक्षा आचार्येण कृतास्ति । यथा - अद्वैतवादिनां 'विवर्तवादः', साङ्ख्यदार्शनिकानां 'परिणामवादः', बौद्धानां 'प्रतिसं-घातवादः' एतेषां मतानामुल्लेखः आचार्येण कृतं वर्तते । सर्वदर्शन-विमर्शानुसारेण परिणामवादे हेतुत्वे कल्प्यमानेऽपि वस्तुनो स्वभावः अपरिवर्तितमेव भवति । उत्तरवर्त्तिनः दशसु - श्लोकेषु आचार्येण सत्कार्यवादस्य विवेचनं तथा च विस्तरेण समीक्षा कृतास्ति ।

कार्यकारणवादस्य प्रक्रियायाः विवेचनं कुर्वन् आचार्यशिव-जीउपाध्यायः वर्णयति यत् -

**"तदुत्पत्तिविनाशाभ्यां तद्गताकृति विक्रिया ।**
**मूलप्रकृतिः सद्भावस्ताभ्यां नैव विकीर्यते" ॥**[14]

अस्मिन् कारिकायां शिवजीउपाध्यायः वस्तुनो उत्पत्तिविनाशाभ्यां विषये वर्णनं करोति । यदा सृष्टेः कस्यापि वस्तुनो वा उत्पत्तिः विनाशश्च भवति तर्हि तस्मिन् उत्पत्ति - विनाशक्रमे कार्य - कारणयोः परस्परः कीदृशो प्रभावः भवति इति विषये आचार्यः विवेचयति । ग्रन्थकारस्य कथनमस्ति यत् यदा कार्यस्य उत्पत्तिः भवति तथा च पुनः कार्यस्य नाशोऽपि भवति, तदा एतद् द्वयं केवलं तस्य वस्तुनो बाह्याकृर्तिं, बाह्यरूपं, बाह्यावस्थायामेव विकार्यन्ते । उत्पत्ति - विनाशक्रमे मूलकारणभूतस्य द्रव्यस्य सत्तायां किमपि परिवर्तनं न भवति अर्थात् सः द्रव्यः अविकृतावस्थायामेव सर्वदा तिष्ठति । यथा - सुवर्णेन कुण्डलस्य निर्माणं भवति पुनश्च तदेव कुण्डलरूपं सुवर्णं विनश्य कण्ठाहारः भवति । अत्र पूर्वं सुवर्णपिण्डेन कुण्डलस्य उत्पत्तिः भवति पुनः कुण्डलस्य विनाशः भवति तथा च कण्ठाहारस्य उत्पत्तिः भवति । सामान्येन दृश्यते चेत् अत्र उत्पत्ति - विनाशाभ्यां प्रक्रिया दृश्यते । परन्तु मूलभूतस्य सुवर्णस्य सत्ता न कदापि उत्पन्ना, न च कदापि नष्टा भवति, सा तु नित्यरूपेण सर्वदा अविकृता एव तिष्ठति ।

आचार्यस्य मतमिदं वर्तते यत् अस्मिन् उत्पत्तिविनाशक्रमे केवलं आकृत्याः एव परिवर्तनं भवति । वस्तुनो मूलभूततत्त्वे मूलस्वरूपे वा किमपि विकृतिः न भवति । सा मूलप्रकृतिः सर्वदा स्वस्वरूपेण एव अवस्थिता भवति । शिवजीउपाध्यायेन उल्लिखितायाम् अस्मिन् कारिकायां परिणामवाद - सिद्धान्तस्य दृग्दर्शनं भवति, अर्थात् वस्तुनो मूलकारणं सदैव यथावत् तिष्ठति, तस्योपरि विविधाः आकृतयः आविर्भवन्ति तिरोभवन्ति च । अतएव 'उत्पत्तिविनाशः' इति शब्देन आकृतिविशेषस्यैव आविर्भावस्य तिरोभावस्य च ग्रहणं भवति न तु मूलसत्तायां किमपि परिवर्तनं भवति ।

अस्मिन् कार्यकारणवादस्य प्रक्रियायाः विवेचनं कुर्वन् आचार्यः इतोऽपि कथयति यत् -

**"पटादिष्वथ नष्टेषु शकलाद्यात्मना स्थितेः ।**
**तत्कार्यं लब्धसत्ताकं विनाशो न निरन्वयः" ॥**[15]

अर्थात् यदा कार्यरूप - द्रव्यस्य विनाशो भवति तदा तत् कारणं पूर्णरूपेण नष्टः न भवति । कारिकायाम् आचार्येण निर्दिश्यते यत् - कार्यरूपद्रव्यस्य विनष्टे सति तस्य सर्वथा अत्यन्ताभावो न जायते यतोहि यदा पटः छिद्यते दह्यते वा तदा तस्य पटस्य पूर्वरूपेण दर्शनं न भवति अथवा तत् पटं पूर्वरूपेण न दृश्यते इति सत्यम्, किन्तु तस्य पटस्य अंशाः शकलरूपेण, भस्मरूपेण, तन्तुरूपेण वा अवशिष्यन्ते एव । एवं सति तत्कार्यभूतं द्रव्यं सर्वथा निरूपाख्यं न भवति, अपितु परिवर्तितायाम् अवस्थायां प्राप्य तत् द्रव्यं सत् रूपेणेव तिष्ठति ।

अतः एवं वक्तुं शक्नुमः यत् विनाशो नाम न कस्यचित् पूर्णरूपेण अभावापत्तिः, परञ्च अभावो नाम अवस्थान्तरप्राप्तिः एव । यदि विनाशो निरन्वयः अर्थात् पूर्णतया मूलतत्त्वस्य विनाशरूपः स्यात् तर्हि वस्तुनो तन्तु - शकलादिरूपेणापि न किञ्चित् अवशिष्टो स्यात्, परञ्च तथा न दृश्यते । अपितु नष्टे जाते वस्तुनो शकलानां, भस्मनः, तन्तूनां वा प्रत्यक्षोपलब्धिः एव प्रमाणं यत् कार्यस्य अन्वयः सत्ता वा सार्वकालिकी भवति तस्य पूर्णरूपेण नाशः नैव सम्भवति ।

अस्मिन् कारिकायां शिवजीउपाध्यायेन कार्यकारणवादस्य सांख्य-दर्शनाभिमत सत्कार्यवादसिद्धान्तः दृढीकृतः । सत्कार्यवादसिद्धान्ते कार्यस्य सत्ता कारणे प्रागेव विद्यते, कार्योत्पत्तिर्नाम तस्य पूर्वमेव विद्यमानस्य कार्यस्य प्राकट्यः एव भवति । अतएव कार्यं नाम केवलं रूपपरिवर्तनम् अस्ति, तस्य कार्यस्य सत्तायाः पूर्णरूपेण नाशोऽपि न भवति । अतः उत्पत्तिः नाम 'आविर्भावः' तथा च विनाशो नाम 'तिरोभावः' इति । एतत् द्वयमपि मूलभूतद्रव्यस्य अवस्थाभेदमात्रम्, न तु तस्य वस्तुनो सत्तायाः उच्छेदः नवीनः सृष्टिर्वा ।

पुनश्च एकेन दृष्टान्तमाध्यमेन आचार्यः विवेचयति यत् -

**"तप्तायोगोलके प्रोच्चैः प्रपतन्तोऽम्बुबिन्दवः ।**
**अदृश्याङ्गतया तस्मात्पृथक् सन्त्यात्मसत्तया" ॥**[16]

अस्मिन् कारिकायां आचार्येण एकेन सुस्पष्टेन लोकदृष्टान्तेन सत्कार्यवादस्य सिद्धान्तः इतोऽपि दृढीकृतः । आचार्यस्य मतमस्ति यत् - यदा कश्चित् तप्तं लौहगोलकं स्थापितं भवति तथा च तस्य गोलकस्योपरि उच्चस्थानात् अम्बुबिन्दवः पतन्ति, ते पतन्ताः बिन्दवः क्षणानन्तरं तापेन उष्मीभूत्वा वायुरूपेण विपरिणमन्ति अर्थात् तत्क्षणमेव ते अम्बुबिन्दवः अदृश्याः भवन्ति । सामान्येन दृश्यते चेत् तेषां जलबिन्दवानां नाशः प्रतीयते । किन्तु आचार्यस्य कथनमस्ति यत् ते जलबिन्दवः सर्वथा नश्यतां न प्राप्नुवन्ति । वास्तविकरूपेण ते तु लौहगोलकस्य अदृश्यतां अङ्गभावरूपं प्राप्ताः सन्तः तत्रैव तिष्ठन्ते । तेषां सत्ता स्थूलरूपेण अनुपलभ्यमाना भवति किन्तु तेषां बिन्दवानां सत्ता तस्मात् लौहगोलकात् पूर्णरूपेण पृथक्

एव तिष्ठति । कार्यकारणवादस्य अस्याम् उपसंहारभूतायां कारिकायां सिद्धान्तद्वयं सिद्ध्यति ।

1. **अदृश्यत्वस्य अभिप्रायः असत्त्वं न भवति** - यद् - यद् न दृश्यते तद् - तद् नष्टम् इति न नियमः । अर्थात् येषां पदार्थानां भौतिकदृष्ट्या दर्शनं न भवति, तेषामपि सत्ता सम्भाव्यते । यथा - तप्तायोगोलके अदृश्याः सन्तः अपि जलबिन्दवः तत्र अवयवरूपेण तिष्ठन्ति एव ।

2. **मिश्रणेऽपि वस्तुनो सत्ता अक्षुण्णा भवति** - यद्यपि अत्र जलं लौहपदार्थेन सह एकीभूतमिव प्रतीयते तथापि तस्य जलस्य स्वकीयं स्वरूपं नष्टं न भवति, अपितु तत् पृथक् रूपेणेव भवति ।

**निष्कर्षः -**

भारतीय नास्तिकास्तिक दर्शनेषु कार्यकारणसिद्धान्तस्य सूक्ष्मतमरूपेण विवेचनं कृतं वर्तते । आस्तिकेषु न्यायवैशेषिकादयः तथा च नास्तिकेषु जैनबौद्धादि सम्प्रदायाः विषयेऽस्मिन् स्वसिद्धान्तानां प्रतिपादनं कृतवन्तः । सर्वेष्वेव सम्प्रदायेषु विद्यमानानां तेषां मूलभूत सिद्धान्तानामाधारेण कार्यकारणसिद्धान्तेऽपि भिन्नता वर्तते, यथा - बौद्धानां सिद्धान्तः असद्कारणवादः, साङ्ख्यदार्शनिकानां सिद्धान्तः सत्कार्यवादः, अद्वैतवादिनां विवर्तवादः, योगदर्शने विशिष्टाद्वैतदर्शने च परिणामवादः, न्यायवैशेषिकाणां सिद्धान्तः असत्कार्यवादः इति नाम्ना एव प्रसिद्धोऽस्ति । आचार्यशिवजीउपाध्यायेन अस्मिन् ग्रन्थे उपरोक्त समेषामेव सिद्धान्तानां प्रतिपादनं कारिकासु कृतम् वर्तते । कारिकासु दृश्यते यत् आचार्येण सर्वेषामेव मतानां सोदाहरण विवेचनानन्तरं सत्कार्यवादस्य मतं सिद्धान्तरूपेण स्वीकृतः ।

आचार्यस्य मतमस्ति यत् कार्यस्य सत्ता प्रागेव कारणे विद्यते तथा च अस्मिन् सत्कार्यवादे नास्तिक - आस्तिकश्च उभयोः सम्मतिरस्ति। 'तदुत्पत्तिविनाशः' इति कारिकायां आचार्येण प्रतिपादितं यत् उत्पत्तिः - विनाशश्च केवलं आकृत्याः एव भवति, अनेन मूलप्रकृतिसद्भावः विकृतिं नैव प्राप्नोति । यथा - मृत्तिकायै घटस्य शरावस्य वा निर्माणं भवति, तस्य घटस्य नाशः अपि भवति । तथापि अस्मिन् प्रक्रियायां मृदारूपद्रव्यं अविकृता एव तिष्ठति । पुनः 'पटादिष्वथनष्टेषु' इति कारिकायां आचार्यः कथयति यत् पदार्थे नष्टे जातेऽपि तत्र तन्तु - भस्म - शकलादिपदार्थाः तस्य सत्तां सूचयन्ति अर्थात् विनाशो निरन्वयः न भवति । यथा - घटो भग्नः सन् कपालरूपेण तिष्ठति तथैव कार्ये नष्टे जातेऽपि विनष्टभूतं कार्यं कथञ्चित् अंशरूपेण अवतिष्ठते । अन्तिमायां कारिकायां उपसंहाररूपेण आचार्यस्य कथनमस्ति यत् - यथा, तप्ताय अयोगोलके जलबिन्दवः तस्मिन्नेव गोलके अन्तर्निहिताः भवन्ति, अदृश्यतां प्राप्तवन्तः अपि ते जलबिन्दवः तत्र लौहपिण्डे एव अवयवरूपेण विद्यमानाः भवन्ति तथा च आत्मसत्तया पिण्डात् पृथग्रूपेणापि निवसन्ति । कार्यकारण सिद्धान्तेऽस्मिन् आचार्यशिवजीउपाध्यायः वस्तुनो अत्यन्ताभावं नैव स्वीकरोति । एषां मतं सांख्यदार्शिकानां सत्कार्यवादस्य एव परिमार्जितं स्वरूपं दृश्यते ।

**सन्दर्भ**


1. तच्च कारणं त्रिविधं - समवाय्यसमवायिनिमित्तभेदात् । - तर्कभाषा, अर्कनाथ चौधरी, पृ. 18
2. उच्यते यत् - समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणम् । यथा - तन्तुसंयोगः पटस्यासमवायिकारणम् । - तर्कभाषा, अर्कनाथ चौधरी, पृ. 34
3. तर्कभाषा, अर्कनाथ चौधरी, पृ. 37
4. किं पुनः करणम् ? साधमतमं करणम् । अतिशयितं साधकं साधकतमं प्रकृष्टं कारणमित्यर्थः । - तर्कभाषा, अर्कनाथ चौधरी, पृ. 11
5. असदकरणादुपादानग्रहणात् सर्वसम्भवाऽभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ - साङ्ख्यकारिका, कारिका - 9
6. 'यदिदं महदादिकार्यं तत् किं प्रधाने सदुताहोस्विदसत्' आचार्यविप्रतिपत्तेरयं संशयः। यतोऽत्र सांख्यदर्शने सत्कार्यः, बौद्धादीनामसत्कार्यम्, 'यदि सदसन्न भवत्यथासत्सन्न भवतीति विप्रतिषेधः' । - गौड़पादभाष्यम्, साङ्ख्यकारिका, कारिका - 9
7. तत्राह - असदकरणात् । न सदसतोऽकरणं तस्मात्सत्कार्यम्, इह लोकेऽसत्करणं नास्ति, यथा सिकताभ्यस्तैलोत्पत्तिः, तस्मात् सत्ः करणादस्ति प्रागुत्पत्तेः प्रधाने व्यक्तम्, अतः सत्कार्यम् । - वही
8. किञ्चान्यत् उपादानग्रहणात् उपादानं कारणं तस्य ग्रहणात्, इह लोके यो येनार्थी स तदुपादानग्रहणं करोति दध्यर्थी क्षीरस्य न तु जलस्य तस्मात् सत्कार्यम् । - गौड़पादभाष्यम्, साङ्ख्यकारिका, कारिका - 9
9. इतश्च सर्वसम्भवाभावात्, सर्वस्य सर्वत्र सम्भवो नास्ति, यथा - सुवर्णस्य रजतादौ तृणपांशुसिकतासु । तस्मात् सर्वसम्भवभावात् सत्कार्यम् - गौड़पादभाष्यम्, साङ्ख्यकारिका, कारिका - 9
10. इतश्च शक्तस्य शक्यकारणात् इह कुलालः शक्तो मृद्दण्डचक्रचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति, तस्मात् सत्कार्यम् । - गौड़पादभाष्यम्, साङ्ख्यकारिका, कारिका - 9
11. इतश्च कारणभावाच्च सत्कार्यम् । कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि, यथा - यवेभ्यो यवाः, ब्रीहेभ्यो ब्रीहयः, यदाऽसत्कार्यं स्यात् ततः कोद्रवेभ्यः शालयः स्युर्न च सन्तीति, तस्मात् सत्कार्यम् । एवं पञ्चभिर्हेतुभिः प्रधाने महदादिलिङ्गमस्ति तस्मात् सत उत्पत्तिर्नासत इति । - गौड़पादभाष्यम्, साङ्ख्यकारिका, कारिका - 9
12. नासतो विद्यते भावो नाभावो विद्यते सतः । - श्रीमद्भगद्गीता, 2.16
13. सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः ॥ - वेदान्तसार
14. सर्वदर्शनविमर्शः, कार्यकारणविमर्शः, कारिका - 717
15. सर्वदर्शनविमर्शः, कार्यकारणविमर्शः, कारिका - 718
16. सर्वदर्शनविमर्शः, कार्यकारणविमर्शः, कारिका - 719